नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 25

No. of Printed Pages — 7

# SS—12—Sanskrit Sah.

# उच्च माध्यमिक परीक्षा, 2014
# SENIOR SECONDARY EXAMINATION, 2014
# संस्कृत साहित्यम्

समय : $3\frac{1}{4}$ ( सपाद होरात्रयम् )

पूर्णाङ्कः 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभि: सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांक अनिवार्यत: लेख्य: ।

(2) सर्वे प्रश्ना: अनिवार्या: ।

(3) प्रत्येकं प्रश्नस्योत्तरम् उत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

## खण्ड - क

1. अधोलिखितम् अपठितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत —

'मुद्राराक्षसम्' नाम नाटकम् महाकविना विशाखदत्तेन विरचितम् अस्ति । मुद्राराक्षसम् सम्पूर्णे संस्कृतसाहित्ये एका विलक्षणा नाट्यकृतिः विद्यते । सप्तसु अङ्केषु विभक्तम् इदं नाटकं राजनीतिप्रधानं कूटनीतिसमाविष्टं चास्ति । अस्य कथावस्तुः, क्लिष्टा कूटनीतियुक्ता चास्ति । अस्मिन् नाटके चाणक्यः मगधराजस्य नन्दस्य मन्त्रिणः राक्षसस्य च मुद्रया विविधानि कार्याणि करोति । अस्मिन् नाटके स्त्रीपात्राणां पूर्णतया अभावः वर्तते, अतएव श्रृंगारस्य अभिव्यञ्जना कुत्रापि न दृश्यते । मुद्राराक्षसम् विशुद्धं घटनाप्रधानं नाटकमस्ति ।

(i) संस्कृतसाहित्ये कस्य नाट्यकृतिः विलक्षणा विद्यते ? ( एकपदेन उत्तरम् ) 1

(ii) मुद्राराक्षस्य वैशिष्ट्यम् किम् अस्ति ? ( पूर्णवाक्येन उत्तरम् ) 1

(iii) "अस्य कथावस्तुः .............. चास्ति ।" इत्यत्र "अस्ति" क्रियायाः कर्तृपदं किम् ? 1

2. निम्नलिखितम् अपठितं गद्यांशं पठित्वा निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत —

श्रेयसाम् अभिवादनं मानवस्य साधारणो धर्मोऽस्ति । अर्हाणाम् अभिवादनेन सदृशं संबलं नाऽस्त्यन्यत् त्रिषु लोकेषु । अभिवादनशीलस्य कृते आचारोऽयं सुखसौभाग्यारोग्यादिसम्पदः कल्पवृक्षः इव स्वयं प्रददाति । अभिवादने विनये च स्थितां महतीं शक्तिं जानन्तः सत्पुरुषाः जन्मतः एव सन्ततीः पूज्यपूजायै प्रेरयन्ति । अभिवादनशीलः जनः असम्भवमपि सम्भवं करोति । अस्मिन् विषये धर्मशास्त्रेषु वर्णितं परममेधाविनः सप्तकल्पान्तजीविनः पुण्यभाजः मुनिमार्कण्डेयस्य प्रथितं वृत्तं सप्रमाणमस्ति । एकदा पितुरङ्के क्रीडन्तं पञ्चवर्षीयं शिशुं मार्कण्डेयं दृष्ट्वा एकेनागन्तुकेन भविष्यवक्त्रा ऋषिणा बालकस्य कृते अलौकिकी-प्रतिभया सहैव पञ्चमासावशिष्टं जीवनं च उद्घोषितम् । तदा मृकण्डुः पुत्राय मार्कण्डेयाय सर्वेषाम् आगन्तुकानां सम्पूज्यानां श्रद्धया विनयेन च अभिवादनं कर्तुं समुपादिशत् । अस्मिन् क्रमे एकदा सप्तर्षयः अपि तत्रागताः । मार्कण्डेयस्य विनयेन श्रद्धया च द्रविताः सप्तर्षयस्तस्मै दीर्घायुष्य-रूपं वरं ददुः । क्षणेनैव क्रान्तदर्शिना वसिष्ठेन सर्वमपि मार्कण्डेयस्य वृत्तं ज्ञातम् ।

(i) मार्कण्डेयस्य पिता कः आसीत् ? ( एकपदेन उत्तरम् ) $\frac{1}{2}$

(ii) भविष्यवक्त्रा मार्कण्डेयस्य विषये किम् उद्घोषितम् ? ( एकपदेन उत्तरम् ) $\frac{1}{2}$

(iii) सत्पुरुषा: जन्मत: एव सन्तती: किमर्थं प्रेरयन्ति ? ( पूर्णवाक्येन उत्तरम् ) 2

(iv) अभिवादनशील: जन: .............................. करोति । इत्यत्र 'करोति' क्रियाया: कर्तृपदं किम् ? 1

(v) "अस्मिन् .............. ।" इत्यस्मिन् वाक्ये 'अस्मिन्' इति सर्वनामपदं कस्य संज्ञापदस्य स्थाने प्रयुक्तम् अस्ति ? 1

(vi) "अधर्म:" इत्यस्य विलोमपदं गद्यांशात् लिखत । 1

(vii) 'पञ्चवर्षीयं शिशुं' इत्यनयो: विशेषणपदं किम् ? 1

(viii) गद्यांशस्य समुचितं शीर्षकं लिखत । 2

## खण्ड - ख

3. प्रदत्त रूपरेखया कथासंयोजनं करणीयम् — 8

एकदा एक: व्याघ्र: — बद्ध: — न मुक्त: — मूषक: — मोचयितुं — क्षुद्रजीव: — जालकर्तनं — बहि: कृतवान् ।

**अथवा**

क्रमरहितानि वाक्यानि समुचित क्रमानुसारं लिखत —

(i) तन्तुवाय: तन्तुवायेन जीविकाम् अर्जयति स्म ।

(ii) तन्तुवाय: महाकवितुल्य: न आसीत् ।

(iii) राजाभोज: मन्त्रिणं लक्ष्मीधरस्य आवासव्यवस्थायै आदिशति ।

(iv) एकदा लक्ष्मीधर: भोजराजस्य सभां गच्छति ।

(v) भोजराज: लक्ष्मीधरस्य वाक्चातुर्येण प्रसन्न: भवति ।

(vi) नगरपाल: नगरे कमपि निरक्षरं मूर्खं वा न अपश्यत् ।

(vii) भोजराज: नगरपालं काव्यप्रतिभाहीनं जनं नगरात् निष्कास्य लक्ष्मीधरं वासयितुम् आदिशति ।

(viii) वस्तुत: तन्तुवाय: अपि कवि: आसीत् ।

4. प्रदत्त संकेतानुसारं वर्णनं लिखत — ( 80 शब्दाः ) 4

भारते उत्सवाः द्विविधाः, राष्ट्रियाः, अगस्तमासस्य, देशः स्वतन्त्रः, देशे उत्सवाः जनवरी मासस्य, राष्ट्रियाः उत्सवाः, संस्कृतज्ञाः संस्कृतोत्सवः, अस्माभिः संस्कृतकार्यक्रमेषु, विदुषां, संस्कृतञ्चैव संस्कृतिः ।

**अथवा**

यत् परितः, पर्यावरणम् , साकं मानवजीवनस्य, प्रकृत्याः वर्तमानकाले सुखस्वरूपा, सुखशान्तियुता अस्ति, वृक्षलतागुल्मवायुजलजीवाः, दुर्लभाः विलुप्यन्ते, अस्माभिः, विषपानं, ऊष्मा, आप्नोति, दुःखमयं सञ्जातम् , पर्यावरणस्य, भूयः भूयः, पर्यावरणदिवसः, प्रवर्धमाना मानवसभ्यतायाः, वर्तते ।

## खण्ड - ग

5. अधोलिखितं गद्यांशं पठित्वा प्रश्नानामुत्तराणि लिखत —

मासोऽयमाषाढः, अस्ति च सायं समयः, अस्तं जिगमिषुर्भगवान् भास्करः सिन्दुरद्रव-स्नातानाभिव वरूण-दिगवलम्बिनामरुण-वारिवाहानामभ्यन्तरं प्रविष्टः । कलविङ्काश्चाटकैर-रुतैः परिपूर्णेषु नीडेषु प्रतिनिवर्तन्ते । वनानि प्रतिक्षणमधिकाधिकां श्यामतां कलयन्ति । अथाकस्मात् परितो मेघमाला पर्वतश्रेणीव प्रादुरभूत् , क्षणं सूक्ष्मविस्तारा, परतः प्रकटित-शिखरि शिखर-विडम्बना, अथ दर्शित-दीर्घं-शुण्डमण्डित-दिगन्त-दन्तावल-भयानकाकारा ततः पारस्परिक-संश्लेष-विहितमहान्धकारा च समस्तं गगनतलं पर्यच्छदीत् ।

(i) सायं समये भगवान् भास्करः कुत्र जिगमिषुः भवति ? ( एकपदेन उत्तरम् ) 1

(ii) गगनतलं के पर्यच्छदीत् ? ( पूर्णवाक्येन उत्तरम् ) 1

(iii) 'श्यामतां' इत्यस्य पदस्य विशेष्यपदेन अन्वितिः कुरुत । 1

(iv) ''मासोऽयम् .................. अस्ति'' इत्यत्र 'अस्ति' क्रियायाः कर्तृपदं किम् ? 1

6. अधोनिर्दिष्टं पद्यं पठित्वा प्रश्नानामुत्तराणि लिखत —

सर्वत्र नो वार्तमवेहि राजन् ।
नाथे कुतस्त्वय्यशुभं प्रजानाम् ।
सूर्ये तपत्यावरणाय दृष्टेः
कल्पेत लोकस्य कथं तमिस्रा ॥

(i) नाथे सति केषाम् अशुभं न भवति ? ( एकपदेन उत्तरम् ) 1

(ii) कौत्सः नृपरघवे किम् अकथयत् ? ( पूर्णवाक्येन उत्तरम् ) 1

(iii) ''दृष्टेः आवरणाय ................. तपति ।'' उचितपदेन अन्वितिं कुरुत । 1

(iv) ''अन्धकारः'' इति पदस्य कः पर्यायः अत्र ? 1

7. निम्नांकितं नाट्यांशं सम्पठ्य निर्दिष्टं प्रश्नानामुत्तराणि लिखत —

कौसल्या — ततः कस्य त्वम् ?

लवः — भगवतः सुगृहीतनामधेयस्य वाल्मीकेः ।

कौसल्या — अयि जात । कथयितव्यं कथय ।

लवः — एतावदेव जानामि ।

( प्रविश्य सम्भ्रान्ताः )

बटवः — कुमार ! कुमार ! अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेष्वनुश्रूयते, सोऽयमधुनाऽस्माभिः स्वयं प्रत्यक्षीकृतः ।

लवः — 'अश्वोऽश्व' इति नाम पशुसमाम्नाये सांग्रामिके च पठ्यते, तद ब्रूत-कीदृशः ?

(i) लवः आत्मानं कस्य पुत्रः कथयति ? ( एकपदेन उत्तरम् ) 1

(ii) 'अश्वः' इति भूतविशेषः कैः प्रत्यक्षीकृतः ? ( पूर्णवाक्येन उत्तरम् ) 1

(iii) 'भगवतः सुगृहीतनामधेयस्य वाल्मीकेः' इत्यत्र विशेषणपदं किम् ? 1

(iv) " 'अश्वोऽश्व' इति नाम पशुसमाम्नाये सांग्रामिके च पठ्यते ।" अस्मिन् वाक्ये कर्तृक्रियापदयोः चयनं कुरुत । 1

8. निम्नलिखितयोः शब्दयोः हिन्दीभाषायां आङ्लभाषायां वा अर्थं लिखत — 1 + 1 = 2

(i) अलिमालः

(ii) सौप्रस्थानिकी ।

9. रेखांकित पदानि आधृत्य प्रश्न निर्माणं कुरुत — 1 + 1 + 1 + 1 = 4

(i) वाक्यमध्ये प्रविश्य सर्वं कार्यं <u>किन्तुना</u> विनाश्यते ।

(ii) पृथिव्याः <u>सप्त</u> भेदाः सन्ति ।

(iii) मनसोऽपि वेगवान् <u>ईश्वरः</u> अस्ति ।

(iv) अस्मिन् संसारे बुद्धियुक्तः <u>सुकृतदुष्कृते</u> उभे जहाति ।

10. निम्नांकित वाक्ययोः भावार्थः हिन्दीभाषायाम् , आङ्लभाषायां संस्कृते वा लेख्यः — 2 + 2 = 4

(i) न कर्म लिप्यते नरे ।

(ii) प्रोद्दीप्ते भवने चे कूपखननं प्रत्युद्यमः कीदृशः ।

11. अधोलिखितस्य श्लोकस्य अन्वयं लिखत — 2

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।

वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥

12. निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत —

(i) "जीवनप्रदीपो निर्वापितो भवितुमिच्छति ।" अस्मिन् वाक्ये कर्तृक्रियापदयोः चयनं कुरुत । 2

(ii) "अपगतमले हि मनसि विशन्ति सुखेनोपदेशगुणाः ।" इत्यत्र विशेषणं किम् ? 1

(iii) "तस्मै व्ययार्थं रत्नचतुष्टयं दास्यामि ।" इत्यत्र रेखांकितपदस्य स्थाने संज्ञापदस्य प्रयोगं कृत्वा वाक्यं पुनः लिखत । 1

(iv) तेषां पर्वतानां नामान्येतानि प्रथमः सुमेरुर्मध्ये, द्वितीयो हिमवान् , तृतीयो हेमकूटः, चतुर्थो निषधः एते सुमेरोरुत्तरतः । इत्यत्र सर्वनामपद चयनं कुरुत । 1

(v) 'अथ सर्वविधविटपिनाम् मध्यभागे स्थितः सुमहान् अश्वत्थदेवः वदति' इत्यत्र रेखांकितपदस्य पर्यायबोधकं पदं लिखत । 1

(vi) "विभूषणं मौनमपण्डितानाम्" इत्यत्र रेखांकितपदस्य विलोमार्थकं पदं लिखत । 1

(vii) "तात ! चन्द्रापीड ! विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति ।" इत्येतत् वाक्यं कः कस्मै कथयति ? 1

13. ऋग्वेदः कति मण्डलेषु विभक्तः अस्ति ? 1

14. भवभूतिः कस्मिन् रसप्रयोगे अद्वितीयः कविः अस्ति ? 1

15. वीररस प्रधानं नाटकम् कः अस्ति ? 1

16. आदिकविः कः वर्तते ? 1

17. संस्कृतसाहित्ये "बृहत्त्रयी" इति नाम्ना कानि काव्यानि प्रसिद्धानि सन्ति ? 2

18. "मीरापुरस्कारेण" कः साहित्यकारः पुरस्कृतः अस्ति ? 1

19. त्रयजन्मनां वृत्तान्तयुक्ता गद्य रचना का अस्ति ? 1

## खण्ड - घ

20. (i) कस्मिन् गणे सर्वेवर्णाः लघवः भवन्ति ? 1

(ii) गणाः कति भवन्ति ? 1

21. अधोलिखितेषु कयोश्चिद् **द्वयोः** लक्षणोदाहरणं लिखत — $1\frac{1}{2} + 1\frac{1}{2} = 3$

(i) मन्दाक्रान्ता

(ii) वंशस्थम्

(iii) अनुष्टुप्

(iv) उपजातिः ।

22. निम्नलिखित पंक्तिषु छन्दसः नामोल्लेखं कुरुत — 1 + 1 + 1 = 3

(i) पद्माकरं दिनकरो विकचीकरोति ।

(ii) विद्यानाम नरस्य रूपमधिकं, प्रच्छन्न-गुप्तं धनम् ।

(iii) पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः ।

23. स्वरव्यञ्जनसमुदायस्य क्रमेण आवृत्तिः कस्मिन् अलंकारे भवति ? तस्य लक्षणम् अपि लिखत ।

1 + 1 = 2

24. अधोलिखितयोः कयोश्चिद् **द्वयोः** अलंकारयोः लक्षणोदाहरणं लिखत — $1\frac{1}{2} + 1\frac{1}{2} = 3$

(i) उपमा

(ii) श्लेषः

(iii) अर्थान्तरन्यासः ।

25. अधोलिखितेषु पंक्तिषु अलंकारस्य नामोल्लेखं कुरुत — 1 + 1 + 1 = 3

(i) संसार विषवृक्षस्य द्वे एव रसवत् फले, काव्यामृत रसास्वादः सङ्गमः सज्जनैः सह ।

(ii) वहन्ति वर्षन्ति नदन्ति भान्ति ध्यायन्ति नृत्यन्ति समाश्वसन्ति ।

(iii) लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।